① 26×13×0.1 c.m.

पेज = 4

प्रालिङ्गदेव भेद भन्न् घत द नुवादे नवास्तव दे वैर

... ...

रुद्राक्षमालाभरण भूषिता: कैवल्य भावपु

② लेखक - प्रियभूषण: सारव

विषय - दर्शन

पेज - 6

- 31×14×0.2 c.m.

भवयासिमध्येत्यो न्यदपु: कलानि नाहिन कल

... ...

न्यक्ष पुंवाति लनान्मायजं पु १६

③ पेज = 2

= 28×13×0.1 c.m.

गान्नरवाभ्रा न्वतयरत्तप्यन्नुदारुणां

... ...

पुन: किभूतजायमान: न केवल ~~देघटांभयाति~~

तद्रूपायामौपाधिको भेदः अन्तरा च वाजसनेयिब्राह्मणेऽपि प्रकरणे कर्मनिष्ठा १४

नत्वपि तु देवभेदमनङ्गीकृत्य वादेन वास्तवदेवैकत्वमेव धारितं तद्यदिदमाहुरमुं यजामुं यजेत्येकैकं देवमेतस्यैव सा विसृष्टिरेष उ ह्येव सर्वे देवा इति नचैकस्माद्देवात्फलभेदो दुःसंपादनीय इति शंकनीयं उपास्तिप्रकारभेदेन तदुपपत्तेः तं यथा यथोपासते तदेव भवतीति श्रुतेः यथैकोपि राजा छत्रचामरादिसेवाप्रकारभेदैः फलभेदहेतुस्तद्वत् ननु देवः फलं ददातीत्येतन्मीमांसको न सहते तथाहि नवमाध्याये विचारितं किं यागेनाराधितायादेवताया उतापूर्वद्वारकं यागस्य फलसाधनत्वमिति संशयः तत्र भंगुरस्य यागस्य कालांतरभाविफलं प्रति साधनत्वायोगादवश्यं द्वारं किंचित्कल्पनीयं देवताप्रसादश्च श्रुतियुक्तिभ्यां तद्द्वारं तस्मात् त एवैनमिंद्रः प्रजया पशुभिस्तर्पयतीति श्रुतेः युक्तिरप्युच्यते क्रियया व्याप्तुमिष्टतमत्वात् कर्मकारकः प्रधानं तेन च कर्मणा व्याप्यत्वात् संप्रदानं ततोपि प्रधानं इंद्रादिदेवतो च संप्रदानत्वेन प्राधान्यात्पूजामर्हतीति यागस्य पूजारूपत्वादतिथिभोजनमिव देवतायाश्चांगत्वात् तस्माद्भोजनादिवद्देवः फलं ददातीति पूर्वः पक्षः अत्रोच्यते यागदेवतयोर्योयमं

लिं०च०
१२

गां गिभावउपन्यस्तः मन्त्रज्ञाद्या कांदानि सावेदलविपर्ययेति तथा हि यजेनेत्यास्यातेन भावना
भिधीयते सा च किं केन कथमिति भाव्यकरणेतिकर्तव्यतालक्षणमंशत्रयं क्रमेण कांक्ष
ति तत्र यागस्य स्वसमानपदोपनीतत्वेप्ययोग्यत्वान्न भाव्यता स्वर्गस्य वाक्यान्तरोपनीत
स्यापि पुरुषार्थत्वेन योग्यत्वात् स्वर्गस्तावस्यात् तस्य स्वर्गसाधनाकांक्षायां यागः कर
णत्वेनान्वेति तच्च करणं सव्यापारत्वात् स्वनिष्पादकं सिद्धं द्रव्यदेवतमिति कर्त्तव्यताञ्च
नयन्हाति ततो यागो गौ देवतावत्वं एवं च सति नान्विथिवद्देवतायागेनभा
व्यते यानुप्रति सन्निधावेन मितिना सोऽस्वार्थेनान्वयवती अत्यन्तादिविरोधात् न
हि कापि दिदिग्रहवनीदेवता हविर्भुक्ता न ना फलं न प्रयच्छतीति शब्देन भोपलभ्यते.

दमा१

प्रभुत्वं तद्भावः अत्यन्तेन योग्यानुपलब्ध्याभावाश्रमीयते किं चाश्वमेधे त्वंगादंष्ट्राभ्यां म
ण्डूकाः कान्ताभिरम्भवर्यवानां दंष्ट्रादिकृत्वा णांहार्विषांभोक्तृत्वेन तेमण्डूकाद्य
स्त्रिंशच्चोदेवताविशेषाः श्रूयन्ते न च तेषां फलदातृत्वं संभाव्यते ओषधीभ्यः स्वा
हा वनस्पतिभ्यः स्वाहा मूलेभ्यः स्वाहेत्यादावचेतनानामोषधिवनस्पति० तथैव

दुर्गा
३

2

यवानां देवतानां च श्रूयते तत्र कुतो हविर्भोक्तृत्वं कुतस्तरां तृप्तिः कुतस्तमां फलदानं तस्माद्विग्र
हाद्यमतां देवतानाम् अभावान्न देवताप्रसादो यागस्य फलद्वारं किंत्वपूर्वमात्रफलसाधनत्वा
न्यथानुपपत्तिकल्प्यमपूर्वं तन्न द्वारमभ्युपगतेऽपि देवेषु पूर्वमेव फलद्वारकत्वम उपपंव
क्तव्यं मंत्रार्थवादेतिहासपुराणेषु देवतानामपि तत्पक्षस्यानुष्ठानवृत्तास्वादिमंत्रप्रयो
गेभ्यः समाहितविग्रहत्वकीर्त्तनात्तस्मात्तु देवः फलप्रद इति सिद्धं औपनिषदास्त्वीश्वरस्य फ
लदातृत्वं मन्यन्ते तथाहि तदीये शास्त्रे तृतीयाध्यायेऽपि विचारितं किं धर्मः फलं ददाति
ग्रहोस्विदीश्वर इति संशयः तत्र मीमांसकोक्तन्यायेन धर्मः फलप्रद इति एवं पूर्वःपक्षः सि
द्धान्तस्तु किं धर्मोऽन्यानधिष्ठित एव फलप्रदः किं वा केनचिच्चेतनेनाधिष्ठितः नाद्यः अचेतन
स्यानारतम्यानामनन्तस्य यथायोचितफलदातृत्वायोगात् द्वितीये त्वयेनाधिष्ठितः स एव फल
दाता स्तु नचैवं धर्मवैयर्थ्यमिति शङ्कनीयं वैषम्यनैर्घृण्यपरिहाराय धर्मापेक्षणात् अ
सति तु धर्मे कांश्चिद् उत्तमं सुखं कांश्चिन्मध्यमं सुखं कांश्चिदधमं ज्ञापयन्नीश्वरः कथं विषमो न
भवेत् कथं वा विचित्रं दुःखं ज्ञापयन् निर्घृणो न भवेत् धर्माधर्मानुसारेण तत्तु ज्ञापयेत्
रूपितराजादीनामिव न वैषम्यनैर्घृण्यप्रसक्तिः नहि [illegible] परिपालनं वा कुर्वतां

लिं०वं०
१८

गुर्वादीनां वैषम्यनैर्घृण्ये विद्येते यदुक्तं स्तेगंभंडूकादीनां तिरश्चामौषधिवनस्पत्यादीनां च स्था
वराणां फलप्रदत्वमयुक्तमिति तत्तथैवास्तु ईश्वरस्य फलदातृत्वे कः प्रसंगः यदपि तत्परत्वेन
सिद्धः प्रजयोपक्रमस्तर्पयतीति तत्राधिदैवतायामवस्थितौ तयोर्मी फलप्रदत्वेन विवक्षि
तः स्यंतः प्रविष्टः शास्ता जनानामिति श्रुतेः तस्मादीश्वरप्रसादएव फलद्वार नवजैमिनी
यशिवस्वामिकयोर्मतयोः परस्परविरोधः विवक्षाविशेषेणतत्समाधानात् यथादेवदत्त
स्यैव कर्तृत्वेपि सम्यगभिज्वलनस्य विवक्षितत्वात्काष्ठानि पचंतीति व्यवहारः तथा परमेश्व
रस्यैव फलप्रदत्वे तारतम्यापादाननिमित्ततया प्राधान्यं विवक्षित्वा धर्मः फलप्रद इति व्य
वहारः किंन स्यात्तस्मादविरोधात् फलप्रदो जगदीश्वरः शिवः शंकरएव सर्वैः पूजनीय इत्य
लमतिप्रसंगेनेति पाद्मे गीतामाहात्म्ये ईश्वरउवाच कदाचिदासने रम्ये सुखासीनम्
रद्विषं प्रान्ते दयिता त्रीलोकानां लक्ष्मीः पप्रच्छ सादरं श्रीरुवाच त्रायालयसि दुग्धाब्धौ भ
गवन्केन हेतुना उदासीन इवैश्वर्ये जगतिस्थापयन्नपि ईश्वरउवाच इतिदेव्यावचः श्रु
त्वामुरारिर्भिन्नामगर्जितम् उवाच स्वःदेण्यया वाचा विस्मयस्मेरलोचनः श्रीभगवानुवा
च नाहं सुमुखि निद्रालु निजं माहेश्वरं महः दृशान्तत्वेन वर्तिन्या पश्यामंतर्निमग्नया

५

सएव

दुर्गा
५

कुशाग्रयाधियादेवियदंतर्योगिनो हृदि पद्मपनियच्च वेदानां सारं मीमांसनेमतं नदेकमत
त्त्वोतिरामरूपमनामयं स्वच्छानंदसंदोहं निष्पंदद्वैतवर्जितं यदाश्रयाज्जगद्वृत्तिर्यन्मा
याचानुभूयते नयेनरहितं किंचिज्जगदेतच्चराचरं निर्मथ्य च सुधा लोके वेदशास्त्राब्धीन्
सुधीः द्वैपायनो यदाप्ताद्य गीताशास्त्रं निरूपयवान् यदास्वायमहानंदमंदीकृतमनाः

मारि= सदा निष्प्रानुरितिदेवेशिःफुग्धाक्षोपप्रतिभासिते ईश्वर उवाच इतितत्समुराराने निर्भरा
नंदद्वंवचः प्रहर्षोत्फुल्ल लोलाक्षी विस्मिये श्रीरुवाच भवानेव हृषीकेशध्येयासि
यमिनां सदा तस्मात्वत्तः परं चान्यदिति कौतूहलं हि मे चराचराणां लोकानां कर्ता हर्ता
स्वयंप्रभुः यथास्थितस्तनोन्यस्त्वं यदिमां बोधयाच्युत श्रीभगवानुवाच मायामयमिदं
देवि वपुर्मे न तु तात्त्विकं सृष्टिस्थित्युपसंहारक्रियाजालोपबृंहितं भूतान्यदात्मनो रू
पं द्वैताद्वैतविवर्जितं भावाभावविनिर्मुक्तमाद्यंतरहितं प्रिये शुद्धसंवित्प्रभाभासंप
रानंदैकमंदिरं रूपमैश्वर्यमात्रैकरम्यं गीतासु कीर्तितं इत्याकर्ण्य वचो देवी देवस्या
मिततेजसः शंकमाना हृवाक्येषु परस्परविरोधितं स्वयं चेत्परमानंदमवाङ्मनसगो
चरं बोधयंतीकथं गीता इतिमेछिंधिसंशयं ईश्वर उवाच न चक्षुर्न्वा च वचो युक्तमिति

लिं०वं०
१५

हाम्बुधःसरं आत्मानुगामिनीं गीतां स्वयंबोधितवान्प्रभुः अत्र [illegible] स्मात्मा परेशोपि परापरवि
भेदतः द्विधा ततः परः साक्षी निर्गुणो निष्कलः शिवः अपरः पंचवक्त्रो हि द्विधा तस्यापि
संस्थितिः शब्दार्थभेदतो वाच्यो यथात्मा हंस्म हेश्वरः गीताख्या वाक्यरूपेणायं शिवः स्थि
यते हृदि मदीयः पाशवे द्योयं संसारो विषयात्मकः यदभ्यासवशादीशः पंचवक्त्रो म
हेश्वरः इति तस्य वचः श्रुत्वा गीताशास्त्रमहोदधेः इदं परा विभेदेन बध्यते भवभीरु
भिः तमपृच्छदिदं वाक्यमगस्त्यं गसंस्थितिं माहात्म्यमिति हासं च सर्वं तस्मै निवेद
येत् श्रृणुष्व [illegible] गीता संस्थितिमात्मनः वक्त्राणि पंच जानीहि पंचाध्यायाननु
क्रमात् दशाध्याया भुजाश्चैकं उदरं द्वे पदांबुजे एवमष्टादशाध्यायी वाङ्मयी मू
र्त्तिरैश्वरी जानीहि स्ताननमात्रेण महापातकनाशिनी इत्यादिना गीतामाहेश्वरी
मूर्त्तिरित्युक्तं अत एव भगवता वासुदेवेनार्जुनं प्रति ईश्वरः सर्वभूतानां हृद्देशे
र्जुन तिष्ठति भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया तमेव शरणं गच्छ सर्वभा
वेन भारत तत्प्रसादात्परां शांतिं स्थानं प्राप्स्यसि शाश्वतमित्यादिना ईश्वरवाच्य
सच्छिवस्यैव प्रसादान्निरतिशयशांतिप्राप्तिर्नान्यस्य प्रसादादिति गीताशास्त्रस्य

दुर्गा
१५

मतं

नान्यद्वस्तीति स्वनितं तथा नैयायिकाः स्वाभिमतं परमात्मानं भवस्यापि एवीश्वरादित्वाद्देवं
व्यवहरंतः परमेश्वरस्यैव परमात्मभावं प्रकटयामासुः तथा भवतन्त्र निमित्तानुसारिणश्च क
ल्पान्तरे कदाचित्तदिच्छावतो कान्त हेश्वरः मतसेवा सर्जदिति ब्रह्माणं च निजेच्छया
इत्यादि रसोत्पत्तिप्रकरणादिषु व्यवहरंतः इत्थं दार्शयं ब्रह्मसूत्रेकृतावपि शब्दादेव
प्रमित इत्यधिकरणे ईशानशब्दरूपयाभिधानश्रुतान्यायांतरनिरपेतया अंगु
ष्ठमात्रः पुरुषः परमात्मा निर्णीत इत्ययमर्थः सर्वेषां संमतः तथा च यस्यायमीशान
शब्दोऽभिधानं न सोमापतेः परमात्मभावः सूत्रकारस्य हृदयस्थितोऽवसीयते दे
वतांतरयोगे न लक्षणया वा प्रयोगो वक्तव्यो नेत्युक्तन्यायासनाभावात् रुद्रेतीन्यप्रभावेन
तदभिधानश्रुतित्वायोगादिति भावः यच्च पुराणादिषु कचित्कचिद्विष्णोर्विधातुर्वा रु
द्रादुत्कर्षः तस्यैवापकर्षः प्रतीयते तत्तयोपाधितद्वतारभेद विषयः वैष्णवे च पुरा
णेषु योपकर्षस्तद्रूपते रुद्रस्यासौ हरस्यास्य विभूतेरेव केवलं उत्कर्षो यः पुराणेषु
हद्रूपते वैष्णवे षु चे अस्यैसत्त्वात्मना विष्णोर्नैस्वरूपेण सत्तम सर्वकारणमीशानः
सांवः सत्यादिलक्षणः न विष्णुर्न विरंचिश्च न देवो नापरः पुमान् इत्यादि परात्पर पु

लिं०चं०
१८

रागादिदूषणदर्शनात् । नचशिवस्य विष्णोर्विरंचेर्वा उद्भवादिवचनाद्दोषनिकर्षः तच्च तंत्रां
कनीयं अहं च भवनो वेलाकल्पांते घोररूपधृक् शूलपाणिर्भविष्यामि क्रोधजस्तव पुत्रकः
सत्पूर्वं ब्रह्मणः पुत्रो ललाटादुत्थितः प्रभुरित्यादि कौर्मराजधर्मादिवचनैस्तस्य लोकानु
ग्रहार्थमेधिकावतारोक्तेः ब्रह्माविष्णुश्च रुद्रश्च श्रीशंभोरखिलेश्वरात् नभिद्यंतेतद
ज्ञात्वाप्यवतारा हरेरिव एवंतत्त्वपवतारस्य कृष्णादेः कीर्त्तनेयथा तदीयत्वेन कीर्त्तनम
हाविष्णोर्गुणाद्यपि एवं शिवस्य कीर्त्तितेन दंडोष्वेकताधिया सर्वकर्त्तृत्व सर्वांतर्यामि
त्वप्रमुखा गुणा इत्यादिनिपुराणाच्च स्कांदेशंकरसंहितायां यथा वेदेषु शास्त्रेषु वि
ख्याधिक उमापतिः पुरुषः परमः साक्षात्पतिः पाशविमोचकः परंब्रह्म परंधाम परं
ज्योतिरनाकुलः मंगलं मंगलानां च पावनानां च पावनं सर्वमंगलकोपेत सतत्वमु
सुमंगलः आगमानगिरो नित्यमम तंप्रवदंति हि तच्च देवपुराणानि शिवं सांबं स
दाशिवं स्वतंत्रमेकमद्वैतं प्रवदन्ति निरंकुशं ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं त
था । भविष्यं नारदीयं च मार्कंडेयमतः परं आग्नेयं ब्रह्मवैवर्त्तं लिंगं वाराहमेव
च स्कांदं च वामनं चैव मात्स्यं कौर्म्यं च गारुडं ब्रह्मांडं चेति पुण्यायं पुराणानामः

8

दुर्गा
१९

मत्क्रमः तत्र शैवानि शैवं च भविष्यच्च द्विजोत्तमाः मार्कंडेयं तथा लैंगं वाराहं स्कांदमेव च मा
त्स्यमन्यत्तथा कौर्मं वामनं च मुनीश्वराः ब्रह्मांडं च दशेमानि त्रीणि लक्षाणि संख्यया
ग्रंथानां महिमा सर्वैः शिवस्यैव प्रकाश्यते असाधारण्यया मूर्त्या नाम्नासौ धारणेन
च वदंति शिवमेतानि शिवसेवा प्रकाश्यते विष्णोर्हि वैष्णवं तत्तथा भागवतं तथा
नारदीयं पुराणं च गारुडं वैष्णवं विदुः पाद्मं ब्राह्मं ब्रह्मणो हि अग्नेराग्नेयमेककं सा
वित्रं ब्रह्मवैवर्तं लिंगमष्टादशास्मृतं दशाष्टौ च पुराणानि सात्त्विकानि विदुर्बुधाः
अष्टादशेयानि द्विजवरैः शेषाणां धर्मसुतेत्रयं तत्र वैष्णवानि च चत्वारि तामसानि मुनीश्वराः व
क्षत्रियाणां श्रोतधर्मो सेसुतद्दैवतानां हरिः ब्राह्मे तु राजसे वैश्यपसेव्ये सर्वत्र संमते
तस्माच्छैवानि विप्राणां पुराणानि हितानि हि तस्मादेतेषु सर्वोत्मा शिवः सर्वोत्त
मोत्तमः पूज्यः सर्वामरान् हित्वा वैकुंठप्रमुखानपि इत्युक्तं शौनकादिभ्यो सत्यवत्स
सुतेन हि एवमेव पुरा केचिदृषयः शान्तसंशयाः मेरौ गत्वा विधातारं दृष्ट्वा तत्र प्र
जापतिं स्तुत्वा तैर्विविधैः स्तोत्रैः पप्रच्छुर्विनयान्विताः ब्रूह्येषां भगवन्ख्यातः संशया

लिं०वं०
१७

विष्टचेतसां परंब्रह्मपरंज्योतिः कोवादेवोभवेदिति तेषांतद्वचनंश्रुत्वाब्रह्माध्यात्वाद्द
र्शनदा हृत्पुंडरीकमध्यस्थं नीलग्रीवंत्रिलोचनं चंद्रार्कभूषणंसौम्यंसच्चिदानंद
विग्रहं कृष्णपिंगलमीशानंरुद्रंसत्यपरात्परं आनंदाश्रुकणान्सिंचन्दुर्बगद्गद
वागयं ईशानःसर्वविद्यानामीश्वरोजगतांप्रभुः ब्रह्मणोधिपतिःशंभुर्विष्णोरधि
पतिःस्वराट् सदाशिवःपरंज्योतिरोंकारस्तिलयोमहान् सएवशंकरःशंभुःपरंब्रह्म
सचेतनः सत्यंसत्यंपुनःसत्यमुद्धृत्यकरमुच्यते तस्मात्सएवसर्वज्ञःशांतवारमयो
च्यते ततसमोनास्तिलोकेषुनपरोनापरःक्वचित् सर्वज्यायानणीयांश्चस्तब्धोवृक्ष
इवाशिवः दिविनिष्ठतिसर्वात्मातेनपूर्णमिदंजगत् यस्माद्वाचोनिवर्त्तन्तेअप्राप्य
मनसासह आनंदमस्ययोवेत्तिनभयंतस्यकुत्रचित् अद्यापिब्रह्मविष्णुभ्यांन
दृष्टोयंमहेश्वरः पशूनांपतिरीशोयंब्रह्माद्याःपशवःस्मृताः बहुनाकिंब्रह्मसए
वऋषिसत्तमाः त्यक्त्वामोहंमहादेवंपरंब्रह्मसनातनं ज्ञात्वाप्रणम्यधातीरसमुत्थो
चविविधैःस्तवैः धृतत्रिपुंड्ररुद्राक्षमालाभरणभूषिताः कैवल्यमापुःसर्वेशाश्व

इतिधातवचःश्रुत्वासर्वेतेऋषिसत्तमाः २५

पत्र २५
दुर्गा १७

तयाप्रजापतेः
निश्चितंब्रह्मण
पूर्वमेवंवदनुसा
रतः ४२५

यथा दशापतेः स्वकाशादेक वीदि स्थो ग्रहो यथाय शितमपि पाचयति तथा लग्नमपि=४ श्लो ४२

दशापतिना सह केन्द्रराशिस्थः=३ केंद्रादित्रयेषु यत्र ग्रहास्तेषामपि वलिक्रमेण दशाक्रमः=२ दशाक्रमवदन्तर्दशापाकक्रमः=५

केंद्रगदशा १ पणफराणां २ आपोक्लिमगानां=३ पणफरगा ग्रहेष्वप्येवमेव पसिफलप्रदाः=१ द्वयोर्भावे=२

मवर्षसिमर्थ्येसेचदद्युः फलानि नहिनफलविपाकः केंद्रसंस्थायभावेभवतिहिफलपक्तिः ध्रुवमापोक्लिमेपि

१ आयुःकृतंयेनहियन्नदेवकल्यादशासाप्रबलस्यपूर्वा साम्येवहूनांबहुवर्षदस्यतेषांचसाम्येप्रथमोदि

तस्य २ एकर्क्षगतेसमेहूंमपहस्यदत्तितत्संबंधिशेषत्रिकोणगृहगाः स्मरगः सरोषपादंफलस्यचतुरस्रगतः

सहोरास्त्वेवंपरस्यरगताः परिपाचयंति ३ स्थानानामयैतानिसवर्णानियितानासवांशपथः छेदविवर्जितान्

दशाहृपिंडेगुणकायथांशाछेदस्तदैकोनदशांशभेदः ४ समग्रवलिनःस्वतुंगभागेसंपूर्णांवलव

र्जितस्यरिक्ता नीचांशगतस्यशत्रुभागेतेपानिष्टफलादशास्तौ ५ अष्टस्थानेगादवरोहिसंज्ञा

मध्याभवेत्सासहृदुच्चभागे आरोहिणीनिम्नपरिच्युतस्यनीचारिभांशेष्वधमाभवेत्सा ६ नीचारि

भांशेसमवस्थितस्यशस्तेगृहेमिश्रफलाप्रदिष्टा संज्ञानुरूपाणिफलान्यथैषांदशासुवक्ष्यामि

फलोपयोगं ७ उभयेयममध्यदृजिताद्येकाएवस्वभेषुचोत्क्रमात् अस्तमेष्टसमास्थिरेकमाद्दो

रायाः परिकल्पितादशा ८ एकेद्वौनवविंशतिर्धृतिकृतीपंचाशदेषांक्रमात् चंद्रारेंदुजशुक्रजीव

दशाप १० तिद्दौन दशाकालस्वार्ध सेहोरी पाचयति=३ अत्र दशापतेः प्रथमम् अंशकल्पना कार्या ततः सादेक वीदि स्थितानां कर्तव्या तस्माद्दशाय तेर्यो भोगग्रहाश्रिति ... भागाः शेषा ... ति प्रत्येकस्यान्य ... पाच्य ... तिनान्ये=४ लग्नमपि यदि सग्रहं तदा तयोर्लग्नग्रहयोर्यो बली सरवांशहारी=४

नि परमोच्चगस्यापि संपूर्णानाम्नी दशा ... यातस्याशारी रारोप धनवृद्धिः ... चिहूनबलः वाकेवलम् ... पूर्णानाम्नी तस्यां दशा यामन्तर्दशा ... नद्याश्रितेच्चारोगः=८

स्वनवांशोपि=८ तेषां राशीनामेकैनार्धक्रमेण केचन सोच्चमूलत्रिकोण छेदो भवति=६ तमित्रहृते=२ अर्धदिवांश यावत्परमोच्चभागः=४ परमोच्चात् भ्रष्टस्य यावत्परमनीचं=५ प्रतिष्ठफलाफलमध्यमं ... अधमात् ... =४

यं विलग्नसमेऽपि चैवं देवस्वामी सिद्धसेनश्च चक्रे। दोषश्चैषां जायते ह्यष्टवृष्टिं हित्वा नाप्नुवन्ति विंशतेः स्यादयस्मा-

त् ७ यस्मिन्योगे पूर्णमायुः प्रदिष्टं तस्मिन्प्रोक्तं चक्रवर्तित्वमन्यैः। प्रत्यक्षोऽयं तेषु दोषोऽपरोऽपि जीवन्त्यायुः

पूर्णं येन विनाऽपि ८ स्वमतेन किलाह जीवशर्मा ग्रहदायं परमायुषः स्वरांशं। ग्रहभुक्तनवांशराशितु-

ल्यं बहुसाम्यं समुपैति सत्यवाक्ये ९ सत्योक्ते ग्रहमिष्टं लिप्तीकृत्वा शतैराप्ते। मंडलभागविशुद्धेऽब्दाः

शेषात्तु मासाद्याः १० स्वतुंगवक्रोपगतैस्त्रिसंगुणं द्विरुत्तमस्वांशकभत्रिभागगैः। इयान्विशेषस्तु भदं-

त्तभाषिते समानमन्यत्प्रथमेऽप्युदीरितं ११ किं त्वत्र भांशप्रतिमं ददाति वीर्यान्वितो राशिसमं च होरा। क्रू-

रोदयोपचयः स नात्र कार्यश्च नाहुः प्रथमोपदिष्टः १२ सत्योपदेशो वरमत्र किं तु कुर्वन्त्ययोग्यं बहुवर्गणाभिः।

आचार्यकं त्वत्र बहुघ्नतायामेकं तु यद्भूरि तदेव कार्यं १३ गुरुशशिसहिते कुलीरलग्ने शशितनये भृ-

गुजे च केंद्रयाते भवरिपुसहजोपगैश्च शेषैरमितमिहायुरनुक्रमाद्विना स्यात् १४ इति श्रीवृहज्जा-

तके वाराहमिहिरविरचिते आयुर्दायाध्यायः सप्तमः ७ उदयरविशशांकप्राणिकेंद्रादिसंस्थाः प्रथ

शैनिकांशस्वादि=२ इस्त्रताबाहुल्यं=१ केसरोद्धविशेषः २

पित्तभंगजनिता रोगाः परस्त्रीहृतापीतिः पापरतैरथ मंनिरतैः पारुष्यतैर्दार्पनिव १४ बौध्यांशे त्यहहहे रुद्रिज

पनं विद्वत्वसं साय शोधुक्तिदत्वस्त वर्णावेसरमही सैभाग्यसौख्यामयः हास्योपासनकौपालं मतिचयोप

मंक्रियासिद्धयः पारुष्यस्त मवंधमानसस्त्वचः पीडाचदोषत्रयात १५ जैव्यांमानगुणोदयो मतिचयः

कांतिः प्रतापोन्नतिमों हात्यो धमसंत्वनीतिन्नपतिस्लाघ्या यमित्रैर्धनं हेमाख्यात्मजकुंजरांवरचयः

प्रीतिस्व सद्भूमिपैः स्त्रुद्रौं हागाहनात्क्रमः भ्रवणाकुवेरं स्थिमीश्वितैः १६ शौक्रांशे गीं प्रति प्रमोदस्त

रमिद्द्यान्नपानांवरस्रोरत्नश्रुतिमल्लयोपकरणात्ताने इमिश्रागमाः कौपालंकृपविक्रयेकृषिनिधि

माप्तिर्धनस्यागमो वृद्धो वीरातिषादयमैरहितैर्वैरं स्वचः स्नेहतः १७ शौरांशे प्रापरवरोष्टपतिमहिषी

हहोगतावामयः श्रेणीग्रामपुराधिकारजनिताह्जाकुधान्यागमः स्नेहषांनिलकोपमोहमतिं

लव्यावन्नितंद्रव्यमों न्यापयकलत्रमसेनमपिश्रा शोतिवर्ध्यगतो १८ दृणास्त्रशस्त्रास्त्रस्त्रमानि

ऊर्वेमनिष्टसंत्रावस्त्रमानिचैवं मिश्रास्त्रमिश्राणिदशाफलानिहोराफलं लग्नपतेः समानं १९ ॥

प्राप्नोति

११

ग्रहभायां तु यत्सूक्ष्म मतिदीप्म सन्तन्हृस्य तः स्विदः=५

ग्रहभायां तु वृंदेनवहुभिः=४

मलीमसतया=

मिश्रायामुभयं=४

नंद्रा निद्रालस्ययोरंतरे वर्तते तस्यालक्षणं हृदये व्याकुलीभावो वाक्येष्टं प्रियगौरवं

मनोवुद्धप्रसादश्च तंद्रायालक्षणं विदुरिति=२

यस्य ज्ञातं कं न ज्ञातं तस्य शरीरच्छाया दृष्ट्वा ग्रहदशाज्ञानम् ॥ २

योगकर्तृत्वं बलिनो दशायां फलं नाभसाः सकलदशासु फलदाः ॥ २

दृष्टिफलं ॥ २

शुभार्थप्राप्तिरशुभार्थहानिः ॥ २

संज्ञाध्याये यस्य यद्द्रव्यमुक्तं कर्माजीवं यच्च यस्योपदिष्टं भावस्थानालोकयोगोद्भवं च तत्तत्सर्वं तस्य योज्यं दशा-
यां २० छायां महाभूतकृतां च सर्वेऽभिव्यञ्जयन्तीह दशामवाप्य क्ष्माम्ब्वग्निवाय्वम्बरजान्गुणांश्च नासास्य-
दृक्त्वक्श्रवणाननेपात् २१ छाया शुभाशुभफलानि निवेदयन्ती लक्ष्या मनुष्यपशुपक्षिषु लक्षण-
ज्ञैः तेजोगुणान्बहिरपि प्रविकाशयन्ती दीपप्रभा स्फटिकरत्नघटस्थितेव २२ स्निग्धद्विजत्वङ्नख-
रोमकेशा छाया सुगन्धा च महीसमुत्था तुष्ट्यर्थलाभाभ्युदयान्करोति धर्मस्य चाहन्यहनि प्रवृत्तिं २३
स्निग्धासिताद्हरितानयनाभिरामा सौभाग्यमार्दवसुखाभ्युदयं करोति सर्वार्थसिद्धिजननी हितपेव॰
वाप्या छाया फले तनुमतां शुभमादधाति २४ चण्डाधृष्यापद्महेमाग्निवर्णा युक्ता तेजोविक्रमैः सप्रतापैः
आग्नेयीति प्राणिनां स्याज्जयाय क्षिप्रं सिद्धिं वाञ्छितार्थस्य धत्ते २५ मलिनपरुषकृष्णा पापगंधानिलो॰
त्था जनयति वधबंधव्याधिनर्थनाशान् स्फटिकसदृशवर्णा भाग्ययुक्तात्युदारा निधिरिव गगनोत्था॰
श्रेयसां स्वच्छवर्णा २६ शुभफलददशायां तादृगेवांतरात्मा बहुजनपतिचंसंसौख्यमर्यागमं च कल्पित

नासाद्युत्पन्नमेयान् गंधादिगुणान् प्रभिव्यञ्जयंति ॥ २ यद्भूमंधःपृथ्वीभवतितद्वायु-धदशा इत्यादि ॥

रजे पंच श्लोकाः छायाशुभेत्या द्यासंहितायां नाम्न्या ॥ २

यथात्र कारद्वयेनसुवर्णाद
एकप्रकारेणसुवर्णप्राप्तोरी
तदा दानस्याधिक्याद्गमदरव = २

अन्यग्रहदत्तविरोधेपिफलंनदिनास्तिअ
न्योग्रहः यतस्तत्तद्दशायां तत्तत्फलम् = २
बलहीनेग्रहे

सर्वीरपेवफलानिनाभसवर्तं स्वदशायांप्रयच्छन्ति
नग्रैकेनग्रहेणविरुद्धफलद्वयंदत्तं तस्मिन्नन्योन्यद्वयोः फलयो
विरोधेसतितस्यफलद्वयस्यनाशंवदेत् यथा एकयोत्कृष्टदशा
फलादिकथा सुवर्णादः अन्ययाष्टकवर्गयोगफलभावफला
नामन्यतमंयासुव
र्णापहारीराजविरो
धेनान्येनसुवर्णला
भोनतद्धानिः = २

फलविपाकैस्तत्कं पेह न्नेमानांपरिणाममतिफलोक्तिः स्वमविंतास्वंवीर्यैः २७ एकग्रहस्य सदृशफलयोर्विरो
धेनाशंवदेयदधिकंफलिस्य ब्रुवतेतत् नान्योग्रहः सदृशमन्यफलंहिनास्ति स्वोस्तां दशाम्नुपगताः स्वफल
प्रदाः स्युः २८ इति श्रीवाराहमिहरकृतेबृहज्जातके दशांतर्दशाध्यायोष्टमः ८ स्वादर्कः प्रथमायबं
धुनिधनद्याज्ञातपोद्यूनगो वक्रात्स्वात्ददिवतद्वदेवरविजाच्छुक्रात्स्मरांत्यारिषु जीवात्धर्मसुताय
शत्रुषुदशाद्यायारिगः शीतगो रेष्वेवांत्यतपः सुतेषु च बुधात् मान्त्वेव्ययंतगः १ इतिरविं लग्नात्षट्
दशायगः स्वधनेधीधर्मेषुचाराच्छशी स्वात्स्वास्तादिषु साष्टसप्तसु रवेः षट्त्र्यायधीस्थोयमात् धीः
त्र्यायाष्टमकंटकेषुतद्वयाज्जीवाच्च पापाष्टगः केंद्रस्य स्वसिताच्चधर्मसुखधीत्र्यायोस्तदोनेगगः २
इति चंद्रः वक्रः स्वात्सचयेष्विनात्सतनयेष्वायाधिकेषुद्यपांचेंद्रात्रैविफलेषुकेंद्रनिधनप्राप्त्ययंगः
स्वाच्छुभः धर्मायाष्टमकेंद्रगोर्कतनयात्ज्ञात्वद्विधीलाभगः शुक्रात्षट्व्ययलाभमृत्युषुगुरोः क
र्मात्यलाभारिषु ३ इति भौमः ज्ञायाधायाष्टतपः स्वेषु भृगुजात्स्वात्सजेष्विंदुजः साज्ञास्तेषुय

दशमेनक्षमंनाप्यक्षमं = ३ घ्यादिषु =

जातचंद्रार्कौ भोयदृशमस्थाने तस्य य: पतिर्ग्रह: स यस्मिन्नंवांशे तस्य नवांशस्य य: पतिस्तस्य वृत्त्या आजीवनं यदा वेदेवात्मकोशपा पितृपत्निशत्रु ४

चंद्रलग्नयोर्दशमग्रहाभावे येमेर्कांशपतिगांशनाथा तेर्वैव यदि जन्मकाले मित्रगृहस्था भवंति तदा मित्रादुनाप्तिः भृत्यैः सुखितः इत्यादि =५ गुणधे: =२

कालबलादि युक्ते =५

एवं जन्मकालाद्नागमेजातधना कालान् कालेकर्मशाबलात् कर्मसिद्धिमाह कर्मेशेति =४

सदा स्वदशास्तुतत्र दृष्या =

अर्थाप्तिः पितृजननिसपत्नमित्रभ्रातृस्त्रीभृतकजनाद्दिवाकराद्यैः होरेंद्वोर्दशमगतैर्विकल्पनीयामे

ह्वर्कांशपदपतिगांशनाथवृत्त्या १ अर्कांशे तृणकनकोर्णभेषजाद्यैश्चंद्रांशे कृषिजलजांगनाश्रयाच्च ।

धात्वग्निप्रहरणसाहसैः कुजांशे सौम्यांशे लिपिगणितादिकाव्यशिल्पैः २ जीवांशे द्विजविबुधा

करादिधर्मैः काव्यांशे मणिरजतादिगोमहिष्यैः सौरांशे श्रमवधभारनीचशिल्पैः कर्मेशाध्यु

षितनवांशकर्मसिद्धिः ३ मित्रारिस्वगृहगतैर्ग्रहैस्ततोर्थं तुंगस्थे बलिनि च भास्करे

स्ववीर्यात् आयस्थैरुदयधनाश्रितैश्च सौम्यैः संचिंत्यं बलसहितैरनेकधास्वं ४ इति श्रीवराह

जातके कर्माजीवाध्यायो दशमः १० प्राहुर्यवनाः स्वतुंगगैः क्रूरैः क्रूरमतिर्महीपतिः क्रूरैस्तु

न जीवशर्मणः पक्षे क्षितिपः प्रजायते १ वक्रार्कजार्कगुरुभिः सकलैस्त्रिभिश्च स्वोच्चेषु

षोडश नृपाः कथितैकलग्ने द्व्येकाश्रितेषु च तथैकतमे विलग्ने स्वक्षेत्रगे शशिनि षोडश भूमिपा

पाः स्युः २ वर्गोत्तमगते लग्ने चंद्रे वा चंद्रवर्जितैः चतुराद्यैर्ग्रहैर्दृष्टे नृपा द्वाविंशतिः स्मृताः ३

लग्नाद्ये: =४

धीरवमुक्तादि =२

भवति

लग्नात् दशमेशः संचारवशात् यस्मिन्नवांशके स्थितः तस्य यः स्वामी तस्य यानि कर्माणि अर्कांशे तृणेत्यादीनि तेषां सिद्धिः प्राप्ता नितानि सिद्ध्यति =४

त्रिप्रभृति स्वोच्चस्थैर्नृपवंशजा राजानो भवंति पंचादि भिरन्यकुलोद्भवा राजानो भवंति त्रिकोणगतैरपि तथा =४

चंद्र: परपत्नयामा पयपत्र =२

रावंचतु (१२ सूर्यादि) ग्रहा: =

चतुर्णामेषां ग्रहाणां मध्यादेकैकस्मिन्नु लग्नस्थे चत्वारो राजयोगाः

किंनुराजतुल्यो धनीजायते =२

त्रिप्रभृतिभिः स्वोच्चगैः =४

अर्थादेवसौम्यैर्धर्मात्मा मिश्रैर्मिश्र इति =४

तेषामेव मध्यात् ... स्वोच्चाश्रितेषु एकतमे लग्नगे द्वादश एकस्मिन् स्वोच्चगे तस्मिन्नेव लग्नगे कर्कस्थे च चंद्रे चत्वारः =२

कन्यायां मलग्नात्षष्ठे=२

रवौ मेषे केतमेतनुगे= मेषलग्ने राकः वृषे द्वितीयः कुंभे नृतीयः ३= तुलालग्ने राकः वृषे सति द्वितीयः=२ सूर्यचंद्रयोश्चापगयोः=२

शनौ=१

यमे कुंभेऽर्के जेगविशशिनि तैलेवने गेन्दुके सिंहालिसंस्थैः शशिजगुरुवकैर्नृपतपः यमे हृतं गेगे सवित

शशिजौ वृषभवने तुलाजेंदुदेवैः ससितकुजजीवैश्च तनये यो ४ कुजे तनगे केंद्रोर्ध्वनवषिपमले प्रेचक्रपतिः

पतिर्भूसे स्यान्यः क्षितिसुतविलग्ने सशशिनि सचंद्रे सौरे स्ते सुरपतिगुरौ चापधरगे स्वगेहगस्ये भानात्

दयम्नपपाते क्षितिपतिः ५ वृषे सेंदौ लग्ने सवितृगुरुतीक्ष्णांशुतनयैः सुहृद्ज्ञापाखस्ये भवति नियम

मानमानवपतिः मृगे मेंदे लग्ने सहजरिपुधर्मव्ययगतैः शशांकाद्यैः स्यातः पृथुगुणयशाः पुंगल

पतिः ६ हये सेंदौ जीवे मृगमुखगते भूमितनये स्वगेहस्थे लग्ने भृगुजशशिजावंत्यपती स्वतस्याव

कार्कीगुरुशशिनिसिताश्चापि हि बुके वृषे कन्यालग्ने भवति हि नृपोन्यो गुणवान् ७ कृषे सेंदौ लग्ने व

ृषस्थगस्रु गेंद्रे शुसहिते यमराकैर्यो भूतलमनुजः शशिलव सुधांशुजे सारे मृन्नौ शशिगृहगते चामर

गुरौ सुरेज्ये वा लग्ने धरणिपतिरन्यो विगुणवान् ८ कर्किणि लग्ने जीवे तनये चंद्रसित शुभेः शुभेः

वगते केंद्रे जाते विंध्याहिकुमसुकुचर पिपीना यं ९ मृगमुखे वर्कतनये तनुसंस्थे क्रियकुलीरहरयो ।

शनौ लग्ने गे=२

मकरलग्ने चंद्रेस भौमे रवौ धनुषि =२

चंद्रभौमबुधजीवैः क्रमात्=५

मीनलग्ने सशुक्रे राकः कन्यालग्ने सबुधे द्वितीयः=६

धनुषिः

भौमे मेषगे=२

10

रिपुपक्षाः सितबुधनतौलिसहितौ बुधस्य क्रमात् क्रौघटितदाहसुपर्णाः पृथिवीशाः १० स्वोच्चसंस्थे बुधे लग्नसंस्थे मीने
सूर्यणास्थिते सजीवे सितेनि शानाथे सजामेदाधपोः स्नते ११ अपिखलकुलजातामानवाराज्यभाजः किम
तनृपकुलोत्थाः प्रोक्तभूपालयोगैः नृपतिकुलसमुत्थाः पार्थिवाख्यत्वमाशोभवति नृपतिततलसं तथभू
पालपुत्रः १२ स्वोच्चस्वत्रिकोणगैर्बलिष्ठैः स्थापैर्भूपतिवंशजानरेंद्राः पंचादिभिरन्यवंशजाताहीने
विन्नपुतानभूमिपालः १३ लेखास्थकेंजेन्दौ लग्नेस्वोच्चे भौमे मंदे कुंभे चापप्रामेजीवेशत्तः पुत्रोविंयाह्वे
नांघे १४ सदेलेस्थकेपातालस्थधर्मस्थाने पामेचंद्रे दुश्चिक्यांगेशांश्रिशानेः शेषेजातः स्वामीभूमेः १५ सौम्ये
वीर्यप्रतेतनुयुक्ते वीर्यादचे च शुभेषु मयाते धर्मसंयोधवपेश्वयशोधैर्यसोत्तान्नृपजः पृथिवीशः १६ वृषोद
येमन्द्रित्रिधनारिलाभगैः शशांकजीवार्कसुतापरेनृपः सुखेगुरौ खेशशितोदृष्टादीयतीयमोदयेलाभगते
नृपोवरेः १७ मेषूरंगणपेतनुगाः शशिमंदजीवाः ज्ञारौधने सितरवीहिबुके नरेंद्रः वक्रासितौ शशिसु
तेज्यसितार्कसौम्याहोरासुखास्तशुभखोशिगताः प्रजेशाः १८ कर्मलग्नगतपाकदशायांराज्यलब्धिरयवा

The following are handwritten notes in the margins and between the lines:

- Above line 1: क्रमात्
- Left margin: सू॰ १९
- Right margin, at line 4: कलहीनैः खेरवा हीनैर्वा=४
- Left margin, at lines 5–6: भूषत्वादसर्वादिते सर्वमेषेवंप्रेपितरोव लग्नस्थे=५
- Right margin, at line 6: बुधे=५
- Left margin, at lines 7–8: गुरुशुक्रयोः स्वतमे=४
- Right margin, at lines 9–10: १४
- Below line 10: बुधभौमशुक्रैः=२
- Below line 10: मीनगेः रविकुजबुधसितैः=३
- Below line 10: राज्यप्राप्तिकालमाह=२
- Below line 10: अंतर्दशायांवा=२

यदि लग्नदशामयोर्द्वयो रपि ग्रहो भवत् तत्र दातयोर्य्यो बलीनस्यां तद्दशाकाले=२ शबरादस्युदासु वक्रयुष्वंतर्दशासु यस्मिन्नंतर्दशाकाले चारवशाद् इति बलित्वं संभवति तस्यामेव=२ शुभग्रहनाशयोर्बलिनः केन्द्रगाः=२ शत्रुगृहगेन नीचगृहगेन चयांतर्दशा दत्ता तस्मिन् चारवशाद् बलिनि लब्धं राज्यस्यापि राज्यहरणं वाच्यं यतः सा छिद्रदशा तस्यापरसंश्रयो राज्ञा कार्यः=२ रधामन्यतमे लग्ने=२

स्वलस्य शत्रुनीचगृहजातनदशापोच्छिद्रसंश्रयदशा परिकल्प्या १९ गुरुबुधसितलग्ने सप्तमस्थेऽर्कपुत्रे वियति दिवसनाथे भोगिनां जन्म विंद्यात् शुभबललग्नकेंद्रैः क्रूरभस्थैश्च पापैः व्रजति शबरदस्युस्वामितामर्थभाक् च २० इति श्रीबृहज्जातके वाराहमिहिरविरचिते राजयोगाध्यायो नाम एकादशः ११ नवदिग्वसवस्त्रिकाग्निवेदैर्गुणिता द्वित्रिचतुर्विकल्पजाः स्युः यवनैस्त्रिगुणा हि षट्शती सा कथिता विस्तरतोऽत्र तत्समासः १ रज्जुर्मुशलं नलश्चराद्यैः सत्सत्त्वोऽश्रयजान् जगाद योगान् केंद्रैः सदसद्युतैर्दलाख्यौ स्रक्सर्पौ कथितौ पराशरेण २ योगा व्रजंत्याश्रयजाः समत्वं यवाब्जवज्राण्डजगोलकाद्यैः केंद्रोपगप्रोक्तफलौ दलाख्यावित्याहुरन्ये न पृथक्फलौ तौ ३ आसन्नकेंद्रभवनद्वयगैर्गदाख्यस्तन्वस्तगेषु शकटं विहगः खवेधौः शृंगाटकं नवमपंचमलग्नसंस्थैर्ते वापी तेषु यदि केंद्राद्बाह्यतः ५ पूर्वशास्त्रानुसारेण मया वज्रादयः कृताः चतुर्थभवने सूर्यात् ज्ञसितौ भवतः कथं ६ कंटकादिप्रवृत्तैस्तु चतुर्गृहगतैर्ग्रहैः यूपेषुशक्तिदंडाख्या होराद्यैः कंटकैः क्रमात् ७ नौकूटच्छत्रचापानि तद्वत्सप्तर्क्षसंस्थितैः अर्द्धचंद्रस्तु

लंग्नान्यगैर्हलमिति प्रवदंति तज्ज्ञाः ४ शकटांडजवच्छुभाशुभैर्वज्रं तद्विपरीतमेर्यवः कमलं तु विमिश्रसंस्थितैः =

नाभसयोगानां च त्वारो विकल्पाः आकृतियोगाः संख्यायोगाश्च विकल्पद्वयं एतौ योगौ २ आश्रययोगाश्चेति विकल्पत्रयम् एते त्रयो दलयोगो चेति विकल्पचतुष्टयम्

तस्याधीनस्यापि यतः कुतश्चिद्योगात् त्रिभिर्भवति=२

चराद्यैर्यथासंख्यं त्र्यक्षैः यथा चरराशौ चरराशिद्वये तत्र येत चरभेके वासर्वे ग्रहाः सर्वे रज्जुः= केंद्रस्थग्रहतुल्यफलौ=४

केंद्रत्रयगतैः पापैः सौम्यैः ५ x आकृतियोगैः संख्या योगैश्च=५ आकृतियोगा नामह=४

पराक्रमौ पोलि मस्थैः=३

यववज्रयोरसंभवमाह=२

तद्वत् लग्नादिकेंद्र० आरम्भकेकस्मात्केन्द्रात्सप्तसु गृहेषु सप्त

लग्नद्वितीयतृतीयचतुर्थेषु यदा सर्वे ग्रहास्तदा यूपः=२

निकटे केंद्रे भवनद्वये यथा लग्ने चतुर्थे सर्वे ग्रहैः एकः४।७ द्वितीयः ७।१० तृ० १०।१ चतु०=४

लग्नं वर्जयित्वा यथासंभवमन्यत्र सर्वे ग्रहाः पर स्परं त्रिकोणगास्तदा हलं

अन्यैर्नौकावपि वराहेणोक्तौ ग्रहवकाशं दृष्टान्त दृष्ट्वायांतैव दर्शितो=४ शकटवच्छुभा विहगवच्चाशुभा वज्रे=२

लग्नादिषु शाकट ... योक्ता ... भोगा
निरंतरं सप्तगृहेषु यदा ग्रहाः स्तदा ... सखाद्
विधः=१ पूर्वोक्ता योगेन संख्या योगो जी
सति४ कार्यः स शाकटाख्यः=३

येषु केषु गृहेषु सप्तसु यदि सर्वे ग्रहाः स्तदा वल्लकी
यदा षट्सु गृहेषु सप्तसु तदा दामनी ... पंचसु पा
शः चतुर्षु केदारः त्रिषु शू
ले द्वयोर्युगं एकस्मिन् गोलः द्वितीयस्थानात्=१ सप्तमगृहे=१

नीच ४२ लग्नात्सप्तमं निरा कोन रस्थितैः=१

12

नाव्याघेः योक्ता स्त्वन्यत्ते संस्थितैः ८ एकान्तरगतैरर्थात् समुद्रः षड्गृहाश्रितैः विलग्नादिस्थितैश्चक्रमि
त्याकृतिभसंग्रहः ९ संख्यायोगाः सप्तसंस्थैस्तैः एकापाये तु वल्लकी दामिनीपाशः केदारः शूलं
योगो युगं च गोलः स्यान्यान् पूर्वमुक्तान् विहाय १० ईर्ष्युर्विदेशनिरतोऽध्वरुचिश्च रज्जौ मानीधनी च मुसले
बहुकृत्यसक्तः व्यंगः स्थिरोऽध्वनिपुणो नलजः सुभुक्तो भोगान्वितो भुजगजो वहुदुःखभाक् च ११
आश्रययोक्तास्त्विफलाभवंत्यसंस्थैस्तैर्निश्चिताः विमिश्रास्तैः फलं तेषामसिद्धाः स्वफलप्रदाः १२ यज्वार्थ
भाक् सततमर्थरुचिर्गदायां तत्पूर्त्तिभुक् शकटजः सरुजः कुदारः हतोऽटनः कलहकृद्विहगोऽथ दृष्टः
शृंगाटके चिरसुखी कृषिकृद्धलाख्ये १३ वज्रेंत्यपूर्वसुखितः सुभगोऽतिशूरो वीर्यान्वितो यवयवे सु
खितो वयोऽन्ते विख्यातलोकोत्तममितसौख्यगुणाब्जपद्मे वाप्यां तनुस्थिर सुखी निधिकृन्न दाता १४ या
गात्मवान्क्रतुवरैर्यजते च यूपे हिंस्रोऽतिगुप्त्यधिकृतः शरकृच्छराख्ये नीचोऽलसः सुखधनैर्विप्र
तमश्च शाक्तौ दंडे प्रियैर्विरहितः पुरुषोऽन्त्यवृत्तिः १५ कीर्त्यान्वितश्चलसुखः कृपणश्च नौजः कूटेऽनृतश्च १५

Left margin: यूप १५
योगैः=
शाकटवृत्तिभुक् =५
वयोंऽतयौवने इ त्यर्थः=३

Right margin: बाल्ये वृद्धत्वे च सुखी यौवने दुःखी=४
भूमौ निधिस्थाप नशीलः=३
कदर्यः=
=बंधन पालकः
अप्रमादी=२ पुत्रादिभिः=२ दासवृत्तिः=२ ततः खल्पं चिरकालं स्थायि सुखं यस्य=३ अनृतभाषी=१
कदाचित्सुखी कदाचिद्दुःखी=१

कारागृहस्थाधिकारी=१

वृक्षत्वेसुखी=१

वनदेवंनपक्षजातः छन्नोद्भवःस्वजनसौख्यकरोनसौख्यः अरण्यकाननकभवःप्रथमोनसौख्यः १६
गृहेंडजःस्वभाष्कांतवपुःप्रधानेस्तोथीलयेनरपतिप्रतिमप्रभोगीचक्रेनरेंद्रसकृद्युतिरंजितांघ्रि
वीरोद्भवसगुणःप्रियगीतनृत्यः १७ दानान्यकार्यनिरतःपशुपक्षदाक्षि पाराधनार्जनविशील
सभस्यवपुःकेदारजःकृषिकरःस्ववहुपयोज्यःस्नरः ततोधनरुचिर्विधनप्रसूले १८ धनविरहि
तःपापवेशीसापुगेत्वघमोलकेविधनमलिनोज्ञानोपेतःकृशिस्यलसोटनःइतिनिगदितावोगाः
साहूंफलैरिहनामसानियतनफलदाश्चिंत्याहोतेसमस्तदशास्वपि १९ इतिश्रीबृहज्जातकेवाराह
मिहिरविरचितेनाभसयोगाध्यायःनामद्वादशः १२ अथमसमवरिष्टानर्ककेंद्रादिसंस्थाशिनिवि
नयवित्तज्ञानधीने गुणानि गृहहतिनिशिचचंद्रेस्वेधिमित्रांशकेवाहरगुरुसितदृष्टेविक्तवान्
सुणान्वावीच १ सौम्यैःस्मरारिनिधनेष्वधियोगइंदोस्तस्मिंश्चमूपसचिवक्षितिपालजन्मसंपन्न
सौख्यविभवाहतशत्रुवस्सा दीर्घायुषोविगतरोगभयाप्रजाताः २ हित्वार्कंस्वनफानफाडुरुधराः

त्रिवुध्यो दिवाजन्मनिपिगुरुदृष्टे रवनवांशे=३
रेकस्मिन्वा निशाजन्मनिसितदृष्टे=३
स्थानेसौम्यासर्वे चंद्रात्=२
एवभवति=२

धनार्जनेविशेषेण शीलंयस्य=३

सर्वकालफलप्रदाः=६
सर्वाल्केंद्रस्थेचंद्रे विनयादीन्यधमा मिश्रोत्तमफलस्थेस मानित्यादि=४

केचित्तु चंद्राच्चतुर्थे सुनफा दशमस्थैरनफा दुरधरा उभयगैः केचित्तु नवांशकेषु यन्नवांशे चंद्रस्तस्माद्द्वितीये यदि नाराग्रहस्तदा सुनफेत्यादि = २

जन्मलग्नात् = २

क्रमात् =

स्मांत्यो भयस्थे शंहेः पीतांशोः कथितोभ्रमाप्तवहुभिः केमद्रुमो नैरसौ केंद्रे शीतकरेथवा ग्रहयुते के
दु. मद्रुमो नोच्यते केचित्केंद्रनवांशकेषु च वदंत्युक्तिः प्रसिद्धा न ते ३ त्रिंशत्सरूपा ३१ सुनफानफाख्यां तौ वत्सर ३२
१६ षट्त्रिंशं १८ दौरुधरस्य भेदाः इच्छाविकल्पैः क्रमशोभिनीय नीते निवृत्तिः पुनरन्यनीतिः ४ स्वय गुणन्यनस्यानां नरेशाचालन = ३
मधिगतवित्तः पार्थिवस्तत्समो वा भवति हि सुनफायां ख्यातनधीवित्तवांश्च प्रभुररगदशरीरः शीलवान्
मनोदुःखनिर्मुक्तः = ५ ख्यातकीर्त्तिर्विषयसुखसमेतो निर्वृतस्त्वनफायां ५ उत्पन्नभोगसुखभुग्धनवाहनाढ्यस्त्यागा ष्ट =
न्वितो दुरुधुराप्रभवः सभृत्यः केमद्रुमे मलिनदुःखितनीचनिःस्वाः प्रेष्याः खलाश्च नृपतेरपि वंशजा
ताः ६ उत्साहशौर्यधनसाहसवान्महीजे सौम्ये पटुः सुवचनो निपुणः कलासु जीवे धर्मसुखभा
क्नृपपूजितश्च कामी भृगौ बहुधनी विषयोपभोक्ता ७ परविभवपरिच्छदोपभोक्ता रवितनये बहु
कार्यकृद्गणेशः अशुभकृदुडुपोह्नि दृश्यमूर्त्तिर्गलिततनुरशुभोन्यथान्यदूह्यं ८ लग्नादतीववसु १६
मान् वसुमानुपांत्यान्सौम्यग्रहैरुपचयोपगतैः समस्तैः द्वाभ्यां समोल्पवसुमांश्च तदूनतायां

दिवा तन्मनिदृश्ये चकार्द्धशुभः = २ एकेन = २

त्रिभिः = २

वतिचलिपिश्च तैः विचरेत्ताकुथितफलैः परतोपरे विकल्प्याः ५ इतिश्रीबृहज्जातके द्विग्रहयोगाध्याय श्चतुर्दशः १४ एकस्थैश्चतुरादिभिर्बलयुतैर्जाताः पृथग्वीर्यगैः शाक्याजीवकवृद्धभिक्षुचरकानिर्ग्रंथ वन्याशनाः माहेयज्ञगुरुक्षपाकरसितज्ञ्याकरैर्मताः क्रमात् प्रव्रज्याबलिभिः समाः परजितैः स्तत्स्वा मिभिः प्रच्युतिः १ रविलुप्तकरैरदीक्षितावलिभिस्तद्गतभक्तयो नराः अभियाचितमात्रदीक्षिता निहतैरन्यनिरीक्षितैरपि २ जन्मेशो ऽन्यैर्यद्यदृष्टोर्कपुत्रं पश्यत्यार्यः किंजन्मपं वा बलोनं दीक्षां प्राप्तो त्यार्किंद्रेः काणसंस्थो भौमार्कौ पश्येच्चंद्रे ३ सुरगुरुशशिहोरास्वार्किदृष्टासु धर्मे गुरुरपि नृपतीनां योगजस्तीर्थकृत्स्यात् नवमभवनसंस्थे मंदके न्यैरदृष्टे भवति नरपयोगे दीक्षितः पार्थि वेंद्रः इतिश्रीबृहज्जातके प्रव्रज्याध्यायो नाम पंचदशः १५ प्रियभूषणः सुरूपः सुभगोदक्षो श्विनीषु मतिमांश्च कृतनिश्चयसत्यारोगदक्षः सुखितश्च भरणीषु १ बहुभुक्परदाररतस्तेज स्वीकृत्तिकासु विख्यातः रोहिण्यां सत्यशुचिः प्रियंवदः स्थिरः सुरूपश्च २ चपलश्चतुरो भीरुः प

गि५२

१७

अल्पयोगजमशुभफलम
पापमप्यशुभं फलं ददाति=१

अशुभोऽपि नेष्टेष्वपि=१

मन्त्र्येषु संस्त्वपि फलेष्विदमुत्कटेन ९ इति श्रीबृहज्जातके वाराहमिहिरविरचिते चंद्रयोगाध्यायस्त्र

द्विग्रहयोगाः=२

योदशः १३ तिग्मांशुर्जनयत्युषेशसहितो यंत्राश्मकारं नरं भौमेनाघरतं (पाप) बुधेन निपुणं धीकीर्तिसौ

ख्यान्वितं क्रूरं वाक्पतिनान्यकार्यनिरतं शुक्रेण रंगायुधैर्लब्धस्वं रविजेन धातुकुशलं भांडप्रकारेषु

कूटद्रव्यादिविक्रयकं=४ पुं

च १ कूटस्त्र्यासवकुंभपण्यमशिवं मातुः सवक्रः शशी सज्ञः प्रश्रितवाक्यमर्थनिपुणं सौभाग्यकी

र्त्यान्वितं विक्रांतं कुलमुख्यमस्थिरमतिं वित्तेश्वरं सांगिरा वस्त्राणां ससितः क्रियादिकुशलं सार्किः

कूटैः कृत्रिमद्रव्यैः द्रव्यप्रतिरूपैः=५

पुनर्भूसुतं २ मूलादिस्नेहकूटैर्व्यवहरति (तैलादि) वणिग्बाहुयोद्धा ससौम्ये पुर्याध्यक्षः सजीवे भवति न

रपतिः प्राप्तवित्तो द्विजो वा गोपो मल्लोऽथ दक्षः परयुवतिरतो द्यूतकृत्सासुरेज्ये दुःखार्तोऽसत्यसंधः सस

भवत्यसंघातानां=३

वितृतनये भूमिजे निंदितश्च ३ सौम्ये रंगचरो बृहस्पतिसुते गीतप्रियो नृत्यविद्वाग्मी भूगणपः

सितेऽपि मृदुना मायापटुर्लंघकः सद्विद्यो धनदारवान्बहुगुणः शुक्रेण युक्ते गुरौ ज्ञेयः श्मश्रुकरो

सितेन घटकृज्जातोऽन्नकारोऽपि वा (रूपका) ४ असितासितसमागमे ल्पवचनं प्रवति समाप्य पतंप्रवहविन्नम

शुक्रेगुरौ=१ घं= मद्यादिकः=२=

गुरुवचनातिक्रामी=२

तथा प्राणायामे दह्येहे दोषान् प्राणायामः परंतप॥ यथा हि शैलधातूनां धम्यतां भस्मनेरजः इंद्रियाणां तथा दोषान् प्रा
णायाम अग्निर्दहेत् दहन्ति॥ धम्यमानं यथा दहेत् धातूनां संभ्रमेनमलं तथेंद्रियकृतो दोषः प्राणायामेन शु
ध्यति योगीयाज्ञवल्क्यः दह्यंते ध्मायमानानां धातूनां हि यथा मलाः तथें द्रियाणि दह्यंते दोषाः प्राणस्य निग्रहात् २४
प्राज्ञर वाग्राह्य तपस्तप्यन्सुदारुणं आत्मानं शोधयेद्यस्तु प्राणायामैः पुनः पुनः मनुः दह्यंते ध्मा
यमानानां धातूनां हि यथा मलाः तथेंद्रियाणां दह्यंते दोषाः प्राणस्य निग्रहात् यथा पर्वत
धातूनां दोषान् दहति पावकः एवमंतर्गतं चैनः प्राणायामेन दह्यति वसिष्ठः निरो
धाज्जायते वायुः वायोरग्निः प्रजायते अग्नेरापो व्यजायंते ततोंऽतः शुध्यते त्रिभिः विष्णुध
र्मोत्तरानि पुराणे निरोधाज्जायते वायुः तस्मादग्निस्ततो जलं त्रिभिः शरीरं सकलं प्राणाया
मैर्विशुध्यति याज्ञवल्क्यः तथा निरोधसंयोगाद्देवतात्रय चिंतनात् अग्नेर्वायोरपांयोगाद्दा
त्मा शुध्यते त्वेवं त्रिभिः निरोधाज्जायते वायुर्वायोरग्निश्च जायते अग्नेरापोऽभिजायंते ततोंऽतः
शुध्यते त्रिभिः मनुः प्राणायामा ब्राह्मणस्य त्रयोपि विधिवत्कृताः व्याहृति प्रणवैर्युक्ता विज्ञेयं
परमं तपः योगियाज्ञवल्क्यः प्राणायामा ब्राह्मणस्य त्रयोपि विधिवत्कृताः व्याहृति प्रणवैः सार्द्धं
विज्ञेयं परमं तपः विष्णुधर्मोत्तरानि पुराणे वत्स प्राणसंधारणं स्नानं कुशाग्रच्युत विंदुना
यः कुर्याद्भसा राजन् प्राणायामं च तत्समं वक्तव्यं हि स्म बोधायन वसिष्ठा त्रिग्निपुराणांश्च योगि
गियाज्ञवल्क्या वष्कापस्तंबाः सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह त्रिः पठेदायतप्राणः प्रा

णायामः सउच्यते याज्ञवल्क्ययोगियाज्ञवल्क्यौ। गायत्रीं शिरसा सार्द्धं जपेद्व्याहृतिपूर्विकां प्रति प्रणव
संयुक्तां त्रिरयं प्राणसंयमः योगियाज्ञवल्क्यः ॐ भूर्भुवः स्वर्महर्जनस्तपः सत्यं तथैव च प्रत्योंका
रसमायुक्तं तत्सवितुर्वरेण्यमपि ॐ आपो ज्योतिरित्येतच्छिरः पश्चात्प्रयोजयेत् एवं मंत्रप्रयो
गस्तु प्राणायामं निबोधत त्रिरावर्तनयोगेन प्राणायामस्तु शब्दितः शंख: ॐ आपो ज्योतिर
सोमृतं ब्रह्म भूर्भुवः स्वरोमिति शिरः योगियाज्ञवल्क्यः षोडशात्तरकं ब्रह्म गायत्र्यास्तु शिरः
स्मृतं ॐ आपो ज्योतिरित्येष मंत्रो यस्तु प्रकीर्त्यते तस्य प्रजापति ऋषिः यजुश्छंदसा विनाब्र
ह्माग्निवायुसूर्याश्च देवतास्समुदाहृताः प्राणसंयमने चैव विनियोग उदाहृतः गायत्रीं शिर
सा सार्द्धं एवं श्रुतिनिदर्शने व्यास: प्रणवव्याहृतियुक्तां गायत्रीं शिरसा सह त्रिः पठेदायत
प्राणः प्राणायामः सउच्यते आधानं शोधनं सर्गवायोस्त्रिः त्रिः समभ्यसेत् ब्रह्माणं केशवं
शंभुं ध्यायेदेतान्नुक्रमात् रक्तं प्रजापतिं ध्यायेत्तद्विष्णुं नीलोत्पलप्रभं शंकरं शुक्लवर्णं च
तं ध्यायेन्मुच्येत्तु बंधनात् योगियाज्ञवल्क्यः पूरके विष्णुसायुज्यं कुंभके ब्रह्मणोंतिकं
रेचकेन तृतीयं तु प्राप्नुयादीश्वरं पदं अथ प्राणायामविधिः तत्र गार्ग्यव्यासः आदौ छंदो शिव.

८ वे ८ २३

यशसामाद्यावापृथिवीयशसेंद्राबृहस्पती यशोभगश्चमाविदद्यशोमाप्रतिपद्यतां २४

3

तिस्रयांसयोभवंतीनिचतुर्थ्यांद्वितीया संख्यायिष्य इति वेतसंवरणइत्यस्यरूपं ततोद्वितीयवस्त्रेणोत्त
रीयंकुर्यात् तथाचपारस्करः अथोत्तरीयं यशसामाद्यावापृथिवीति तत्रमंत्रः यशसेत्यादि
अस्यार्थः द्यावापृथिवी आकाशपृथिवी आकाशपृथिव्योमांछादयेतामिति क्रियापदमध्याहृ
तंवोढव्यंकेनयशसा किंचइंद्राबृहस्पती इंद्रबृहस्पतीयशसामाछादयेतां किंचयशो मामाश्च
विदत् प्राप्नोति नकेवलंयशश्च भगश्च सौभाग्यंचमामाविदत् किंचयशोमामांप्रतिपद्यतांप्रति
यछतु पुनः पुनरभि धानमादरातिशयार्थं अनेनोत्तरीयवस्त्राछादनेन आकाशंपृथिवी इं
द्राबृहस्पती चमांयशसा आछादयंतु उत्तरोत्तरंयशः सौभाग्यंचममभवत्विति आशंसा
वाक्यार्थः ततः पुष्पमालांगृन्हीयात् तथाचपारस्करः सुमनसः प्रतिगृन्हाति याआहरज्जम
दग्निरिति मंत्रः याआहरदित्यादि अस्यार्थः याः पुष्पस्रजः जमदग्निर्महर्षिः राहरत् आहृतवान्
किमर्थंश्रद्धायै एवमेवेतिप्रत्ययः श्रद्धातदर्थंकामाय अभिलषितसिद्ध्यर्थं इंद्रियायचक्षुरा
दीन्द्रियप्राप्त्यर्थंच ताः पुष्पस्रजः अहंप्रतिगृह्णामि किमर्थंयशसाचयशसेचभगेनचसौभा
ग्यायजमदग्निमहर्षिणायाः पुष्पस्रजः श्रद्धादिप्राप्त्यर्थंसीताः ताएवाहंयशः सौभाग्यप्राप्त्
याआहरज्जमदग्निः श्रद्धायैकामायेंद्रियाय ताअहंप्रतिगृन्हामियशसा
चभगेनच २५

यद्यशो ऽप्सरसामिंद्रश्चकार विपुलं पृथु तेन संग्रथिताः सुमनस आबध्नामि यशो मयि ४२

येनबध्नामीति वाक्यार्थः यशसा च भगेन चेति च तुर्थ्यर्थे तृतीया ततः तन्माल्यं शिरसि बध्नीयात् ५
तथा च पारस्करः अथाव बध्नाते यद्यशोऽप्सरसामिति मंत्रो यथा यद्यश इत्यादि अस्यार्थः
इंद्रो ऽप्सरसां उर्वशी प्रभृतीनां यद्यशः उर्वशी प्रभृतीनां रूपवत्ता एवं रूपं तद्यशो विपुलं विस्तीर्णं
चकार कृतवान् किं भूतं यशः पृथु बहुतरं तेन यशसा संग्रथिताः सम्यक् ग्रथिताः सुमन
सः पुष्पाणि मयि आबध्नामि किमर्थं यशः यशसे सुमाप्सरसामिव रूपवत्तया शोभ
२ वत्वित्यभिप्रायः इंद्रेणाप्सरसां रूपवत्तयाय द्यशः कृतं तेन यशसा सूत्रस्थानीये न ग्रथिता
नि पुष्पाणि मम अपि रूपवत्त्वयशो भवत्विति अनेन दृष्टं माल्यमहमात्मन्याबध्नामीति वाक्यार्थः
यशो मयीति चतुर्थ्यर्थे प्रथमा ततः अहतेन वाससा उष्णीषं कुर्यात् तथा च पारस्करः उष्णी
३ षेण शिरो वेष्टयेत् युवा सुवासा इति मंत्रो यथा युवा सुवासाः परिवीत आगात्स उ श्रेयान् भ
वति जायमानः तं धीरासः कवय उन्नयंति स्वाध्यो मनसा देवयंतः अस्यार्थः यो युवा परिवी
तो वस्त्रवेष्टितः सन् आगात् आगतवान् स एव श्रेयान् श्रेष्ठो भवति उ छांदसः सोत्रार्थः किं भू
तः सुवासाः शोभनवस्त्रधारी पुनः किं भूतं जायमानः न केवलं श्रेष्ठो भवति तं युवानं धी शिव.